श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अघमर्षणसूक्तम् ॥
## (द्राविड पाठम्)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अघमर्षणसूक्तम् ॥

## (द्राविड पाठम्)

हिर॑ण्यशृङ्ग॒ं वरु॑णं॒ प्रप॑द्ये
ती॒र्थं मे॑ देहि॒ याचि॑तः।
य॒न्मया॑ भु॒क्तम॒साधू॑नां पा॒पेभ्य॑श्च प्र॒तिग्र॑हः।
यन्मे॒ मन॑सा वा॒चा॒ क॒र्म॒णा वा दु॑ष्कृ॒तं कृतम्।
तन्न॒ इन्द्रो॒ वरु॑णो॒ बृह॒स्पति॑स्सवि॒ता च॑
पुनन्तु॒ पुनः॑पुनः॥ 1॥

सु॒मि॒त्रा न॒ आप॒ ओष॑धयस्सन्तु दुर्मि॒त्रास्तस्मै॑
भूयासु॒र्यो᳚ऽस्मान् द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
नमो॒ऽग्नये᳚ऽप्सु॒मते॒ नम॒ इन्द्रा॑य॒
नमो॒ वरु॑णाय॒ नमो॑ वारु॒ण्यै नमो॒ऽद्भ्यः।
यद॒पां क्रू॒रं यद॑मे॒ध्यं यद॑शा॒न्तं तदप॑गच्छतात्।
अ॒त्या॒श॒नाद॑तीपा॒ना॒द्य॒च्च उ॑ग्रात् प्र॒तिग्र॑हात्।
तन्मे॒ वरु॑णो रा॒जा॒ पा॒णिना᳚ ह्यव॒मर्श॑तु।
सो॑ऽहम॑पा॒पो वि॒रजो॒ निर्मु॒क्तो मु॑क्तकि॒ल्बिष॑ः।
नाक॑स्य पृ॒ष्ठमारु॑ह्य गच्छे॒द् ब्रह्म॑सलो॒कताम्।
इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतु॑द्रि॒ स्तोम॑ग्ं

सचता॒ परु॒ष्णिया।
अ॒सि॒क्नि॒या म॑रुद्वृधे वि॒तस्त॒याऽऽर्जीकीये
शृणु॒ह्या सु॒षोम॑या।
ऋ॒तं च॑ स॒त्यं चाभी॓द्धात्तप॒सोऽध्य॑जायत॥ **2**॥

ततो॒ रात्रि॑रजायत॒ तत॑स्समु॒द्रो अ॑र्ण॒वः।
स॒मु॒द्रादर्ण॒वादधि॑ संवथ्स॒रो अ॑जायत।
अ॒हो॒रा॒त्राणि॑ वि॒दध॒द्विश्व॑स्य मिष॒तो व॒शी।
सू॒र्या॒च॒न्द्र॒मसौ॑ धा॒ता य॑था पू॒र्वम॑कल्पयत्।
दिव॑ं च पृथि॒वीं चा॒न्तरि॑क्ष॒मथो॒ सुव॑ः।
यत् पृ॑थि॒व्याग्ं रज॑स्स्व॒मान्तरि॑क्षे वि॒रोद॑सी।
इ॒माग्स्तदा॒पो व॑रुणः पु॒नात्व॑घमर्ष॒णः।
ए॒ष भू॒तस्य॑ भ॒व्ये भुव॑नस्य गो॒प्ता।
ए॒ष पु॒ण्यकृ॑तां लो॒का॒ने॒ष मृ॒त्योर्हि॑र॒ण्मय॓म्।
द्यावा॑पृथि॒व्योर्हि॑र॒ण्मय॒ग्ं सग्ग्
श्रि॑त॒ग्ं सुव॑ः॥ **3**॥

स नः॒ सुव॒ः सग्ंशि॑शाधि।
आर्द्रं॒ ज्वल॑ति॒ ज्योति॑र॒हम॑स्मि।
ज्योति॒र्ज्वल॑ति॒ ब्रह्मा॒हम॑स्मि।
यो॑ऽहम॑स्मि॒ ब्रह्मा॒हम॑स्मि।
अ॒हम॒वाहं मां जु॑होमि॒ स्वाहा॓।

अ॒का॒र्य॒का॒र्य॑वकी॒र्णीस्ते॒नो भ्रू॒ण॒हा गु॑रुत॒ल्पगः॑।
वरु॑णो॒ऽपाम॑घमर्॒ष॒णस्तस्मा॓त् पा॒पात्प्रमु॑च्यते।
र॒जोभूमि॑स्त्व॒माग्ं रोद॑यस्व॒ प्रव॑दन्ति॒ धीरा॓ः।
पु॒नन्तु॒ ऋष॑यः पु॒नन्तु॒ वस॑वः पु॒नातु॒ वरु॑णः
पु॒नात्व॑घमर्॒ष॒णः।
आऽक्रा॓न्थ्समु॒द्रः प्र॑थ॒मे विध॑र्मञ्ज॒नयन्॒
प्र॒जा भुव॑नस्य॒ राजा॓॥ **4**॥

ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

**॥ इति अघमर्षणसूक्तं समाप्तम्॥**